"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः" ॥) केशः । इति मेदिनी ॥ देशभेदः । इति शब्दरत्नावली ॥ (पर्व्वतविशेषः ॥ यथा गोः रामायणे ४ । ४१ । ५० ।
"ततः शक्रध्वजाकारः कुञ्जरो नाम पर्व्वतः ।
अगस्त्यभवनं तत्र निर्म्मितं विश्वकर्म्मणा" ॥)

कुञ्जरपिप्पली, स्त्री, (कुञ्जरनाम्नी पिप्पली ।) गजपिप्पली । इति शब्दमाला ॥ (गजपिप्पलीशब्देऽस्या विवृतिर्ज्ञेया ॥)

कुञ्जरक्षारमूलं, क्ली, (कुञ्जरपिप्पल्या इव क्षारं उग्रं मूलमस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

कुञ्जरा, स्त्री, (कुञ्जः हस्तिदन्त इव पुष्पं अस्त्यस्याः । रप्रत्यये अच् तत अजादित्वात् टाप् ।) धातकी । धाइफुल इति भाषा । (अस्याः पर्य्याया यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्या धातकीशब्दे ज्ञातव्याः ॥) पाटलावृक्षः । इति मेदिनी ॥ (कुञ्जर + टाप् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जरारातिः, पुं, (कुञ्जरस्य अरातिः शत्रुः ।) शरभः इति हेमचन्द्रः ॥ (सिंहः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कुञ्जरालुकं, क्ली, (कुञ्जरसंज्ञकं आलुकम् ।) आलुकविशेषः । हस्त्यालु । इति शब्दचन्द्रिका ॥

कुञ्जराशनः, पुं, (कुञ्जरेण अश्यते । अश भोजने + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य विवरणं ज्ञेयम् ॥)

कुञ्जरी, स्त्री, (कुञ्जर + जातित्वात् ङीष् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जलं, क्ली, (कुत्सितं जलमिव जलं यत्र । पृषोदरात् साधुः ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुञ्जवल्लरी, स्त्री, (कुञ्जाकृतिरिव कुञ्जाकारा वा वल्लरी ।) निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुञ्जिका, स्त्री, (कुनज + ण्वुल् + टाप् इत्वं च ।) कृष्णजीरकः । कुञ्चिका इति क्वचित् पाठः । इति जटाधरः ॥ निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुट ह वैकल्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । इदित् ।) पञ्चमस्वरी । ह कुण्ट्यते । वैकल्यमिह विकलीकरणम् । कुण्टति जनं शोकः । इति दुर्गादासः ॥

कुट श कौटिल्ये । इति कविकल्पद्रुमः ॥ (तुदां-परं-अकं-सकं च-सेट् ।) श कुटति अकुटीत् चुकोट कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इति दुर्गादासः ॥

कुट क ङ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) पञ्चमस्वरी । क ङ कोटयते । एषोऽन्यैर्न मन्यते । इति दुर्गादासः ॥

कुटः, पुं क्ली, (कुट + कः ।) कलशः । इत्यमरः । २ । ९ । ३२ ॥

कुटः, पुं, (कुट् + कः ।) कोटः । इति मेदिनी । गड़ इत्यादि भाषा ॥ शिलाकुट्टम् । पातरभाङ्गा हातुड़ी इति भाषा । वृक्षः । इति हेमचन्द्रः ॥ पर्व्वतः । इति हारावली ॥ (कुटिले त्रि, यथा, ऋग्वेदे १ । ४६ । ४ । "हविषाजारो अपां पिपर्त्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः" ॥)

कुटङ्कः, पुं, (कुटं गृहभूमिः टङ्क्यते आच्छाद्यतेऽनेन । कु + टकि आच्छादने । करणे घञ् ।) गृहाच्छादनम् । इति शब्दमाला ॥ चाल इति ख्यातः ॥

कुटङ्गकः, पुं, (कुटस्याङ्गमिव । शकन्ध्वादित्वात् साधुः ।) वृक्षलतागहनम् । छदिः । चाल इति भाषा । गृहभेदः । इत्यमरटीकायां मुकुटादयः ॥ कुँड़े इति भाषा ॥

कुटचः, पुं, (कुटे गिरौ चीयते उत्पद्यते । चि + डः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥ (कुटजशब्दे गुणादयोऽस्य बोद्धव्याः ॥)

कुटजः, पुं, (कुटे पर्व्वते जायते । जन् + डः ।) पुष्पवृक्षविशेषः । यस्य फलं इन्द्रयवः । कुड़ची इति भाषा ॥ (यथा, माघे ६ । २५ ।
"कुटजपुष्पपरागकणाः स्फुटं
विदधिरे दधिरेणुविडम्बनाम्" ॥)
तत्पर्य्यायः । शक्रः २ वत्सकः ३ गिरिमल्लिका ४ । इत्यमरः । २ । ४ । ६६ ॥ कौटजः ५ । इति तट्टीका ॥ वत्सकः ६ शक्रपर्य्यायः ७ । इति रत्नमाला ॥ कुटजः ८ कोही ९ कालिङ्गः १० मल्लिकापुष्पः ११ प्रावृष्यः १२ शत्रुपादपः १३ वरतिक्तः १४ यवफलः १५ संग्राही १६ पाण्डुरद्रुमः १७ प्रावृषेण्यः १८ महागन्धः १९ पाण्डुरः २० । इति शब्दरत्नावली ॥ अपि च ।
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ।
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । अतिसारनाशित्वञ्च । असितस्य तस्य गुणाः । रक्तपित्तत्वग्दोषार्शोनाशित्वम् । इति राजनिर्घण्टः ॥ कफनाशकत्वम् । इति राजवल्लभः ॥
("कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः ।
लेहितोऽतिविषायुक्तः सर्व्वातीसारनुद्भवेत्" ॥
"कुटजस्य फलं ग्राह्यमष्टभागजले सृतम् ।
तथैव विपचेद्भूयो दाड़िमोदकसंयुतम् ॥
यावच्चैव लसीकाभं सृतं तमुपकल्पयेत् ।
तस्यार्द्धकर्षं तक्रेण पिबेदत्यतिसारवान् ॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्" ।
इति वैद्यकचक्रपाणिसंग्रहेऽतिसाराधिकारे ॥) अगस्त्यमुनिः । द्रोणाचार्य्यः । इति मेदिनी ॥

कुटन्नटं, क्ली, (कुटन् वक्रीभवन् सन् नटति । नट स्पन्दने + पचाद्यच् ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १३१ ॥ केउटिया मुता इति ख्यातम् । केशुर इति नीचोक्तिः । इति तट्टीका ॥
(अस्य व्यवहारो यत्र तद्यथा ।
"पद्मकं चन्दनोशीरं पाठां मूर्व्वां कुटन्नटम्" ॥
इति वाभटे चिकित्सास्थाने १० अध्याये ।
अस्य पर्य्यायाः यथा ।
"कुटन्नटं परं बल्यं मुस्ताभञ्च मरीकवम्" ॥
इति वैद्यकरत्नमालायाम् ॥
कोसची मोथा । गुड़तजी इति च । इयन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥
पर्य्यायाश्च यथा ।
"कुटन्नटं दासपुरं वालेयं परिपेलवम् ।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च ।
मुस्तावत् पेलवपुटं शुक्लाभं स्याद्वितुन्नकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥ गुणाश्चास्य वितुन्नकशब्दे ज्ञातव्याः ॥)

कुटन्नटः, पुं, (कुटन् सन् नटति । नट् + अच् ।) श्योनाकवृक्षः । इत्यमरः । २ । ४ । ५७ ॥
(अस्य पर्य्याया यथा ।
"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ।
दीर्घवृन्तो रलुश्चापि पृथुशिम्बः कटम्भरः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ श्योनाकशब्देऽस्य गुणाश्च बोद्धव्याः ॥)

कुटपः, पुं, (कुटात् विपज्जालात् पाति रक्षति । कुट् + पा + कः ।) मुनिः । निष्कुटः । गृहसमीपोपवनम् । (कुट + "उषिकुटिदलीति" । उणां ३ । १४२ । इति कपन् ।) मानभेदः । स तु कुड़वपरिमाणम् । इति हेमचन्द्रः ॥ कमले क्ली । इति राजनिर्घण्टः ॥

कुटरं, क्ली, (कुट + बाहुलकात् करन् ।) कुठरः मन्थानदण्डबन्धनस्तम्भः । इत्यमरटीकायां नीलकण्ठः ॥

कुटरुः, पुं, (कुट + "कुटः किच्च" । उणां ४ । ८० । इत्यरुः किच्च ।) वस्त्रगृहम् । इत्युणादिकोषः ॥ कानात् तांवु इति भाषा ॥

कुटरणा, स्त्री, (कुटेषु वृक्षेषु अरणा । शकन्ध्वादित्वात् साधुः ।) त्रिवृता । इति रत्नमाला ॥ तेउड़ी इति भाषा ॥

कुटलं, क्ली, (कुटति आच्छादयत्यनेन । कुट् + करणे कलच् ।) पटलम् । इति हारावली ॥ चाल छाद इति भाषा ॥

कुटहारिका, स्त्री, (कुटं कलशं हरति जलाद्यानयनार्थं गृह्णाति या । कुट + हृ + ण्वुल् टाप् इत्वं च ।) दासी । इति हेमचन्द्रः ॥

कुटिः, स्त्री, (कुट्यते सङ्कोच्यते द्रुमादिभिः असौ । कुट् + "कृ गृ शृ पॄ कुटीति" । उणां ४ । १४२ । इति इः स च कित् ।) गृहम् । इत्यमरटीकायां भरतः ॥

कुटिः, पुं, (कुट्यते छिद्यतेऽसौ । कुट छेदने + "कुटि कम्प्योर्नलोपश्च" । उणां ४ । १४३ । इति इः । स च कित् । धातोर्नलोपश्च ।) वृक्षः । इति शब्दरत्नावली ॥ शरीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्व्वतः । इत्युज्ज्वलदत्तः । ४ । १४३ ॥)

कुटिचरः, पुं, (कुटिं कुटिलं जले चरतीति । कुटि +